संस्कृतवार्ताः

20.11.2024

सायम्  - 06:20

<u>मुख्यवार्ताः</u>

· प्रधानमन्त्री नरेन्द्रमोदी अद्य सायंकाले जॉर्जटाउननगरे गुयानादेशस्य राष्ट्रपतिना डॉ. मोहम्मद इरफान अली इत्यनेन सह वार्तालापं करिष्यति।

· गुयानादेशः प्रधानमन्त्रिणे नरेंद्रमोदिने स्वस्य सर्वोच्चं राष्ट्रियपुरस्कारं "द ऑर्डर ऑफ एक्सीलेंस" इति प्रदास्यति।

· झारखण्ड-महाराष्ट्रराज्ययो: मतदानं सम्पन्नम्।

· पञ्चपञ्चाशत्तम: भारत-अन्ताराष्ट्रिय-चलचित्र-महोत्सव: अद्य गोवाराज्ये समारब्धम्।

· बैडमिण्टन्-क्रीडायाम् अद्य चीनस्य शेनझेन्-नगरे चतुर्विंशत्यधिक द्विसहस्र तमवर्षस्य चीन-मास्टर्स्-इति प्रतियोगितायां भारतीय--क्रीडिकादलं, पी.वी.सिन्धु:-मालविका-बन्सोड-लक्ष्य-सेन: च प्र-प्रागुपान्त्यचक्रीय-क्रीडायां प्रविष्टवन्तः।

<u>प्रधानमन्त्री-गुयानायात्रा</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य सायंकाले जॉर्जटाउननगरे गुयानादेशस्य राष्ट्रपतिना डॉ. मोहम्मद इरफान अली इत्यनेन सह वार्तालापं करिष्यति। वार्तायाः अनन्तरं अनेकानि सन्धिपत्राणि हस्ताक्षरितानि भविष्यन्ति इति अपेक्षते। अद्य प्रातः प्रधानमन्त्री त्रिदिवसीययात्रार्थं गुयानादेशं सम्प्राप्तवान्। तत्र सविशेषं तस्य स्वागतं विमानस्थानके एव स्वयं राष्ट्रपतिना अली इत्यनेन द्वादशतोप्यधिकैः मन्त्रिमण्डलमन्त्रिभिः सह कृतम् । प्रधानमन्त्री मोदी अद्य द्वितीयकैरिकॉम-भारतशिखरसम्मेलने अपि भागं ग्रहीष्यति, कैरिकॉम-सदस्यदेशानां नेतृभिः सह च उपवेशनं करिष्यति, यद्धि भारतस्य क्षेत्रैः समं दीर्घकालिक-मैत्री अपि अधिकं वर्धयितुं शक्यते। श्वः प्रधानमन्त्री गुयानादेशस्य संसदं सम्बोधयिष्यति। सः भारतीयप्रवासिनाम् सभां अपि सम्बोधयिष्यति । भारतस्य गुयानादेशेन सह स्वास्थ्य-संपर्क- नवीकरणीयशक्ति- जल-चेत्यादिषु क्षेत्रेषु दीर्घकालीना विकासात्मिकी सहभागिता अस्ति । यात्रावधौ गुयानादेशः

प्रधानमन्त्रिणे नरेंद्रमोदिने स्वस्य सर्वोच्चं राष्ट्रियपुरस्कारं "द ऑर्डर ऑफ एक्सीलेंस" इति प्रदास्यति। बार्बाडोस् प्रधानमन्त्रिणे बार्बाडोस् इत्यस्य -ऑर्डर ऑफ फ्रीडम् इति प्रतिष्ठितं मानद-पुरस्कारं प्रदास्यति । कतिपयदिनानि पूर्वं डोमिनिकादेशेन श्रीमोदिनः कृते सर्वोच्चः राष्ट्रियपुरस्कारः-"डोमिनिका अवॉर्ड ऑफ ऑनर पुरस्कारः" अपि घोषितः आसीत् ।

झारखण्ड-महाराष्ट्रमतदानम्

झारखण्ड-महाराष्ट्रराज्ययो: मतदानं सम्पन्नम्। झारखण्डे द्वितीयाय अन्तिमाय च चरणाय द्वादश-जनपदानाम् अष्टत्रिंशदासनेभ्य: मतदानं समनुष्ठितम्। झारखण्डे सार्धसप्तषष्टितोप्यधिकं तत्रैव महाराष्ट्रे सपादाष्टपञ्चाशततोप्यधिकं प्रतिशततायां मतदानं जातम् । अवधेयं यत् मतदानं प्रात: सप्तवादने समारब्धः सद्य एव पञ्चवादने समाप्तम्। एतस्मिन् चरणे अष्टाविंशत्यधिक-पञ्चशतं प्रत्याशिन: नैर्वाचनिकरणे सङ्घर्षरता: सन्ति। झारखण्डस्य मुख्य-निर्वाचनाधिकारी के. रविकुमार: मतदातृभि: आग्रहं कृतवान् आसीत् यत्ते भयेन विना मतदानं कुर्वन्तु इति। तत्रैव महाराष्ट्रराज्ये सर्वेभ्य: अष्टाशीत्यधिक-द्विशतम् आसनेभ्य: एकस्मिन्नेव चरणे एव मतदानं सञ्जातम्। मतदानं सप्तवादनत: सायंषड्वादनपर्यन्तं प्राचलत्। महाराष्ट्रस्य मुख्यनिर्वाचनाधिकारी एस चोकलिंगम: सूचितवान् यत् राज्ये भूयोऽपि पञ्चलक्षं यावत् मतदातृकर्मिण: सप्तविंशत्यधिक-चतुश्शतोत्तरैकलक्षं मतदातृकेन्द्राणां प्रबन्धनं कृतवन्तः। महाराष्ट्रस्य नान्देड़-संसदीयक्षेत्रस्य चतुर्णां पञ्जाब-उत्तरप्रदेश-केरल-उत्तराखण्ड-राज्यानां पञ्चदशविधानसभासनेभ्य: उपनिर्वाचनमपि विहितम्। अपरत्र मतगणना त्रयोविंशदिनाङ्के भविष्यति।

भारत-कॉप- 29

भारतेन विकसितदेशानाम् आह्वानं कृतम् यत् ते विकासशीलदेशानां अनुकूलवित्त-आवश्यकतानां सम्बद्धाः सहमतप्रतिबद्धताः पूरयन्तु। अजरबैजानदेशस्य बाकुनगरे संयुक्तराष्ट्रसङ्घस्य वातावरणपरिवर्तनशिखरसम्मेलनस्य CoP29 इत्यस्य अवधौ एकस्मिन् वक्तव्ये भारतेन उक्तं यत्, विकासशीलदेशाः वातावरणपरिवर्तनस्य प्रभावैः बहुधा विकसितदेशानाम् ऐतिहासि-उत्सर्जनस्य कारणेन पीडिताः सन्ति। विकासशीलदेशेषु जनानां जीवनं, आजीविका च संकटे वर्तेते। वित्तीयसंसाधनानाम् महत्त्वाकांक्षीप्रवाहस्य तत्कालीनावश्यकताम् प्रकाशयन् भारतेन पुष्टिः कृता

यत् नवीनसामूहिकमात्राकृतलक्ष्यस्य (NCQG) इत्यस्य निम्नवितरणस्य, परिवर्तनशीलानाम् आवश्यकतानाम् अनुकूलतायै तन्यतायाः अभावस्य, कठोरपात्रतामापदण्डैः सह जटिलस्वीकृत्यप्रक्रियाणां च सम्बोधनस्य आवश्यकता वर्तते।

## ऋतुविभागः

भारतस्य ऋतु-विभागेन IMD इत्यनेन अद्य तमिलनाडु, पुडुचेरी, कराईकल इत्येतेषु स्थानेषु प्रचण्डवृष्ट्याः सम्भावना प्रकटिता अस्ति। तत्रैव अद्य लक्षद्वीप-केरल-महे-क्षेत्रेषु अपि प्रचण्डवृष्टिः भविष्यति इति अनुमीयते । ऋतु विभागेन उक्तं यत् सप्ताहे अण्डमान-निकोबार-द्वीपसमूहेषु निम्नात्-मध्यम-वृष्टेः सम्भावना अस्ति । ऋतुविभागेन पूर्वोत्तरप्रदेशे रात्रौ प्रातःकाले च सघनतः अत्यन्तं सघनपर्यन्तं खवाष्प- स्थितेः अपि सम्भावना प्रकटिता अस्ति। विभागेन ख्यापितं यत् आगामि-द्वि-त्रि दिवसैः दिल्ली-एनसीआर-क्षेत्रेषु रात्रौ प्रातः च सघनखवाष्पस्य स्थितिः भविष्यति।

## राजनाथः - लाओस् भ्रमणम्

आसियान रक्षामन्त्रिणां सभायां एडीएमएम-प्लस् इत्यस्मिन् भागं ग्रहीतुं रक्षामन्त्री राजनाथसिंहः लाओसस्य त्रिदिवसीययात्रायां प्रवर्तते। समागमे सः क्षेत्रीय-अन्ताराष्ट्रियसुरक्षाविषयेषु सभाम् अपि सम्बोधयिष्यति। एडीएमएम इति आसियानदेशानां सर्वोच्चं रक्षापरामर्शात्मकं सहकारीं च तन्त्रम् अस्ति । एडीएमएम-प्लस् इति आसियानसदस्यदेशानां ब्रुनेई, कम्बोडिया, इन्डोनेशिया, लाओस्, मलेशिया, म्यांमार, फिलिपिन्स, सिङ्गापुर, थाईलैण्ड्, वियतनाम-भारत- अमेरिका-चीन-रूस-जापान-दक्षिणकोरिया चेत्त्यादीनाम् अष्टानां संवादसहभागीनाम् एकः मञ्चः अस्ति। एडीएमएम-प्लस्-मन्त्रिणः आसियानदेशानाम् अन्यदेशानां च सहकार्यं सुदृढं कर्तुं प्रतिवर्षं मिलन्ति । सभायाः काले श्रीसिंहः आस्ट्रेलिया, चीन, जापान, लाओस्, मलेशिया, न्यूजीलैण्ड्, फिलिपिन्स, दक्षिणकोरिया, अमेरिकादेशानां सहभागि समकक्षैः सह अपि द्विपक्षीयोपवेशनं करिष्यति इति अपेक्षते। एतेषाम् उपवेशनानाम् उद्देश्यम् एतेषां देशैः सह द्विपक्षीयरक्षासहकार्यं इतोपि वर्धयितुं वर्तते।

चलचित्रमहोत्सव:

पञ्चपञ्चाशत्तम: भारत-अन्ताराष्ट्रिय-चलचित्र-महोत्सव: अद्य गोवाराज्ये समारब्धम्। इदं भव्यम् आयोजनम् अस्य मासस्य अष्टाविंशतिदिनाङ्कं यावत् प्रचलिष्यति। गोवाराज्यस्य मुख्यमन्त्री डॉ. प्रमोदसांवत: व्यवस्थां समीक्षितुं डॉ. श्यामा-प्रसाद-मुखर्जी-सभागारस्य भ्रमणं कृतवान्। आकाशवाण्या सह सम्भाषमाण: श्रीसांवत: प्रख्यापितवान् यत् सर्वविध-व्यवस्था: तत्र सम्पूरिता:। अद्य सायं चतुर्वादने उद्घाटन-समारोहः अभवत्। सूचनाप्रसारण-सचिव: सञ्जय-जाजू इत्येष: अपि सूचितवान् यत् एतस्मिन् महोत्सवे नैके नवीना: कार्यक्रमा: अपि योजिता:।

हॉकीतिप्रतिस्पर्धा

हॉकीतिप्रतिस्पर्धायाम्  अधुना बिहारप्रदेशस्य राजगीर- हॉकी - क्रीडाङ्गणे महिलानां एशियाई - हॉकी -चैम्पियनट्रॉफीइत्यस्याः स्पर्धाया:  अन्त्यचक्रे   भारतं चीनदेशेन सह क्रीडति।

बैडमिन्टन - चीनमास्टर्स्

बैडमिण्टन्-क्रीडायाम् अद्य चीनस्य शेनझेन्-नगरे चतुर्विंशत्यधिक द्विसहस्र तमवर्षस्य चीन-मास्टर्स्-इति प्रतियोगितायां भारतीय--क्रीडिकादलं, पी.वी.सिन्धु:-मालविका-बन्सोड-लक्ष्य-सेन: च प्र-प्रागुपान्त्यचक्रीय-क्रीडायां प्रविष्टवन्तः।

।।इति वार्ता:।।